प्रद्युम्नानन्दीयनाटके धर्मपरिरक्षणम्

Dr. Pathan Vali Saheb @ Mahammad Vali Khan
Guest Lecturer in Sanskrit
Sri Venkateswara Vedic University
TIRUPATI - 517 502
Mobile No. 8885161850
Email ID: mahammadvalipathan@gmail.com

अस्मिन् लोके मानवः निरन्तरं धर्मार्थकाममोक्षाख्यपुरुषार्थलाभाय यतेत, नो चेत् तस्य जीवितं निरर्थकमेव भवेत्। तस्मै तादृशपुरुषार्थं संस्कृतवाङ्मयं प्रयच्छतीत्यत्र नास्ति यस्य कस्यापि सन्देहावकाशः। हितोपदेशे नारायणपण्डितः एतदेव कथयति पाटलीपुत्रस्य राज्ञः सुदर्शनमुखेन। तद्यथा -

धर्मार्थकाममोक्षाणां, यस्यैकोपि न विद्यते।
अजागलस्तनस्येव तस्य जन्म निरर्थकम्।। इति।

प्राणभूतान् धर्मार्थकाममोक्षरूपपुरुषार्थान् उद्दिश्य प्रयतमानः मानवः लौकिकं पारमार्थिकञ्च लक्ष्यं साधयन्नेव औन्नत्यं लभते। तादृशपुरुषार्थेषु धर्मः चरमपुरुषार्थसाधकतया मुख्यो ऽस्ति। काव्यानि च **रामादिवद्वर्तितव्यं न रावणादिवत्** इति धर्मं कान्तासम्मिततया उपदिशन्ति।

1.कविपरिचयः -

संस्कृतवाङ्मये विद्वदग्रगण्यः विश्वगुणादर्शचम्पूग्रन्थप्रणेता **श्रीमद्वेङ्कटाध्वरी** उदारशृङ्गाररसोपेतं प्रद्युम्नानन्दीयनाटकमरचयत्। अयं काञ्चीपुरवासी अत्रिमहर्षिगोत्रापत्यस्य **अप्पयाचार्य** इत्युपाह्वस्य आत्रेय-श्रीनिवासमखिनः पौत्रः च। अस्य माता **सीताम्बा**, पिता च ख्यातः आत्रेयवंशमौक्तिकः श्लेषयमकचक्रवर्ती **श्रीरघुनाथार्ययज्वा** इति।

तस्य श्रीरघुनाथार्यमखिनः पुत्रः अयं कविः वेङ्कटार्याध्वरी त्रय्यञ्चलद्वयाक्रिया-तर्कप्रौढचमत्क्रियासु च निपुणः, मीमांसकोत्तंसकः तिरुपतिक्षेत्रनिवासी चावर्तत[1]।

अयं वेङ्कटाध्वरी **चम्पूग्रन्थाने**कान्, **नाटकानि** च त्रि-चतुराणि, लक्ष्मीसहस्र-श्रवणानन्दप्रभृतीनि च **विविधस्तोत्राणि च व्यरचयत्।** अनल्पकल्पनाभरिते काव्यपथे इव - 1.**व्याकरणे** - महाभाष्यस्फूर्तिं, **2.तर्कशास्त्रे** - मणिसारखण्डनं, **3.मीमांसायां** - विधित्रयपरित्राणं, **4.विशिष्टाद्वैतवेदान्ते** - नयद्युमणिदीपिकां च प्रणीतवान्।

---

1. **तस्यैतस्य तनूभवः कविरयं त्रय्यञ्चलद्वयाक्रिया, तर्कप्रौढचमत्क्रियासु निपुणो मीमांसकोत्तंसकः।**
तत्तादृक्कविता सरोजसविता दत्ताशयश्श्रीपतेः, शेषक्ष्माधरवासिनश्चरणयो-श्रीवेङ्कटार्याध्वरी।। 1.10।।

तादृशगुणयुक्तेन **वेङ्कटार्याध्वरिणा** निबद्धे प्रद्युम्नानन्दीयनाटके - अस्य श्रीवेङ्कटाचार्यस्योक्तयः स्मरवधूकर्णावतंसोत्पल-स्वैरोदञ्चितशीधुपूरसुहृदः विदुषां मुदे कल्पन्ते। शृङ्गारपारङ्गताः श्रीमत्तिर्मलनायपण्डितमुखाः श्रोत्रैः सुचिरं निपीय श्लाघाविलोलं शिरः दधते[2]।

एवमत्र नाटकस्य कृतिकर्तुः वंशपरम्परां मञ्चोपरि सूत्रधार-नटसम्भाषणामुखेन संश्रावणात् अयं वेङ्कटाचार्यमखी सदाचारसम्पन्नः, परमधार्मिकः, चतुश्शास्त्रपारावारपारीणः, बहुग्रन्थकर्ता इति, मनुस्मृत्युक्तरीत्या अध्ययन-अध्यापन-यजन-याजन-दान-प्रतिग्रहरूपषड्विधधर्ममनुसरतीति च ज्ञायते[3]।

2.नाटकपरिचयः -

इदं नाटकं प्रद्युम्न-रत्योः परिणयप्रतिपादकं षडङ्कसहितम् उदारवीरशृङ्गारोपेतं[4] नव्यं श्लेषयमकचमत्कारविचित्रितं, सुरुचिरं, सुमनोहरम् अनितरसाधारणरीत्या कविना निर्मितम्। अत्रत्य शैली गम्भीरा, उत्कृष्टा च । काचन मातृकासु तत्पट्टिकासु , नाटकपुष्पिकासु च अस्यैव प्रद्युमनानन्दम् इत्यपि नाम दृश्यते।

अत्र नाटके कल्याणाः = उत्कृष्टाः, कथानायकगुणाः = शौर्यौदार्यादयो गुणाः वर्णिताः। अतः नाटकमिदम् उत्तमम् आदर्शप्रायञ्च भवति, सर्वजनान् रञ्जयति च[5]। सभाकृति-नायकाभ्यामस्य नाटकप्रयोगस्य पावनता भोग्यता च सिद्ध्यति। यतः अत्र सभानायकः देवः वेङ्कटपतिः **श्रीनिवासः**, कथानायकः जगत्प्रभोः श्रीकृष्णस्य तनुभवः शृङ्गाररङ्गावनिः स्वयं **प्रद्युन** एव। तद्यथा -

अन्तर्यामितया चिरन्तनगिरामन्तेषु निर्धारितो
दिष्ट्या हन्त स एव वेङ्कटपतिर्देवस्सभानायकः।
श्रीकृष्णस्य जगत्प्रभोस्तनुभवश्शृङ्गाररङ्गावनिः
प्रख्यातः कृतिनायकस्तु भगवान् प्रद्युम्न एव स्वयम्।। 15।। इति।

सुधापानरसिकाः वेङ्कटकवेः रुचिरमधुवीचीरसमुचः समीचीनाः वाचः स्वादयन्तु।

2. **कल्पन्ते विदुषां मुदे स्मरवधूकर्णावतंसोत्पल-स्वैरोदञ्चितशीधुपूरसुहृदश्श्रीवेङ्कटार्योक्तयः। श्रोत्रैर्या सुचिरं निपीय दधते शृङ्गारपारङ्गताः, श्रीमत्तिर्मलनायपण्डितमुखाश्श्लाघाविलोलं शिरः।।** प्रद्यु. **1.11**
3. **अध्यापनमध्ययनं यजनं याजनं तथा। दानं प्रतिग्रहं चैव ब्राह्मणानामकल्पयत्।।** मनुस्मृतिः 1.8
4. **उदारवीरशृङ्गारोद्दीपकं रूपकं त्वया। नव्यमत्र प्रयोक्तव्यमुत्तमश्लोकनायकम्।।** प्रद्यु. 1.3
5. **कल्याणनायकगुणे सुदृशां स्तनमण्डले। नाटके हाटके चैव न चेतः कस्य रज्यति।।** प्रद्यु. 1.4

3.प्रद्युम्नानन्दीयनाटके धार्मिकांशानां निबन्धनम्

नाट्यस्य महत्त्वं नाट्यशास्त्रे भरतेन सविस्तरं व्याख्यातम्। तद्यथा -

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।
विश्रान्तिजननं काले नाट्यमेतद् भविष्यति।।

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतत् भविष्यति।।[6] इति।

दर्भकमुनिः स्वाश्रमे देहश्रिया कृष्णेन स्पर्धमानं प्रद्युम्नमवर्धयत। धनुर्विद्यां च अशिक्षयत्। गृहीतविद्यः प्राप्तयौवनः प्रद्युम्नः [7] विदूषकसहायः एकदा वनसौभाग्यविलोकनाय भृगुमद्गिरितटमायाति। यौवनारूढं प्रद्युम्नं ज्ञात्वा, शम्बरवधकाङ्क्षी देवेन्द्रः विषयममुं मायावत्यै निवेदयितुं नारदमनियमयत्। ततः नारदेन उद्बोधिता मायावत्यपि [8] सखीभ्यां सह मज्जदुज्जीवनसरः प्राप्नोति।

3.1 . पर्यावरणस्पृहा -

तत्र तापापनोदाय प्रद्युम्न-विदूषकौ मज्जदुज्जीवनसरस्तीरमुपसर्पतः। तत्र तस्य सरोवरस्य सर्वोत्तरं रामणीयकम् **मे दृष्टिं पुनीते, श्रममपि धुनीते** इति स्वयं प्रद्युम्नः स्वानुभव-पूर्वकं सरोवर्णनमुखेन कथयति। तद्यथा -

नवोद्गच्छत्कच्छस्फुटविटपिगुच्छस्रुतमधु-
द्विरुक्तस्वादुत्वस्फुरणविमलस्वच्छसलिलम्।
गभीरं नाळीकस्थिरपरिमळश्रीसुरभिळं
पुनीते मे दृष्टिं श्रममपि धुनीते सर इदम्।। 62।। इति।

---

6. नाट्यशास्त्रम्, प्रथमाध्यायः, श्लो. 114, 115
7. शिवस्य फालनेत्राग्निना दग्धः कामः श्रीकृष्णाद्रुक्मिण्यां प्रद्युम्नरूपेण सञ्जातः।
8. मन्मथविरहखिन्ना रतिदेवी परमेश्वरं स्वतपसा सन्तोषयति। तदा तां प्रति परमेश्वरः - **श्रीकृष्णाद्रुक्मिण्यां प्रद्युम्ननाम्ना जन्मान्तरं प्राप्तेन तव प्रियेण समागमिष्यति। तावत्पर्यन्तं मायावतीरूपेण ऋक्षवन्तनगराधीशस्य मायाविनः शम्बरासुरस्य गृहे पाकशालाधिकारं प्राप्य, मदुपदिष्टमायाविद्यया निजपातिव्रज्यं रक्षन्ती तिष्ठ -** इत्युपदिशति।

3.2. मायावत्याः दर्शनं कन्यात्वेन सम्भाव्य तस्याः वर्णनम् -

ततः विदूषकोक्तं सद्यस्तनाश्लेषनिपुणपदं श्रुत्वा प्रद्युम्नः अन्तर्हासं कुर्वन् - **मज्जनं कृत्वा मङ्गलोचितं** इति नेपथ्यगानं श्रुत्वा, **कमपि रसं कर्णयोर्दुहानः कलवलयध्वरिरयं मां कबलयति** इति ब्रवीति। पुनः विदूषकस्य अग्रे पश्यतु कमपि नेत्रोत्सवं इति वचनात् तत्र मज्जदुज्जीवनसरसि स्नात्वा, चिकुरशोषण-अलङ्करणादीनि कुर्वतीषु युवतिषु मायावतीं दृष्ट्वा प्रद्युम्नः सानुरागो भवति। अपि च सोत्कण्ठं -

कनकमयलता वा कान्तिकल्लोलिनी वा, रजनिकरकला वा रत्नदीपप्रभा वा
किमचिररुचिवल्ली केयमीदृग्विधश्रीः मदयति हृदयं मे मन्मथस्येव माया।।1.67

इत्यादिश्लोकैः तां कन्यात्वेन सम्भाव्य बहु वर्णयति[9]।

1. ततश्च प्रद्युम्न-विदूषकौ वेतसलताकुहरे तिरोहितौ भूत्वा विश्रब्धं तासां व्यापारम् अवधारयतः। ततः वसन्तोत्सवः (कामदेवपूजा) प्रचलति। तदा मायावती हरिद्राचूर्णपिण्डेन मन्मथविग्रहं निर्माति। तदा प्रद्युम्नः तं **मन्मथविग्रहं मे लोचनयोर्विनोदं तनोती** ति, मायावत्याः देवसपर्यासमयानुरूपं वेषं - **क्षामाङ्ग्याः गरिमैकसीम्नि जघने क्षौमांशुकं मोदते** इति च वर्णयति।

2. अपि च देवताराधनसमये अव्यभिचरितशास्त्रसरणिं विदधत्याः मायावत्याः ध्यानप्रकारं प्रद्युम्नः इत्थं वर्णयति -

नासाग्रलम्बिनवमौक्तिकमर्धनीलं, नेत्रांशुभिः प्रसृमरैर्हरिनीलयन्ती।
उद्भासते निभृतमुन्नमितस्तनीयं, दीप्ता निवात इव सद्मनि दीपरेखा।। 1.75।। इति।

एवं ध्यानं कथं वा करणीयम् इत्यत्र मायावत्याः दर्शनेन प्रेक्षकाः उत्प्रेरिताः भवन्ति।

3.3. आत्मनः मित्रस्य तर्जनम्

ततः विचक्षणा वचनानुसारं मायावती पुनः पुष्पाणि अञ्जलिना गृह्णाति। यदा विदूषकः “एषा कामिनी सूनलाजान् गृहीत्वा, कन्येव जयति अतः त्वं प्रतिसरं बध्नातु” इति कथयति तदा प्रद्युम्नः असत्यं प्रियं मा वदतु यतो हि -

---

9. **यस्मात् कामयते सर्वान् कमेर्धातोश्च भाविनि!। तस्मात् कन्येह सुश्रोणि! स्वतन्त्रा वरवर्णिनि।।** महाभारतम्, अ.प.
ततो गच्छेत् धर्मज्ञ कन्यातीर्थमनुत्तमम्। कन्यातीर्थे नरः स्नात्वा गोसहस्रफलं लभेत्।। म.भा. 3.83.104

किमन्वया किमावासा कस्य हेतोरिहागता।
कन्या[10] **पाणिगृहीती**[11] **वेत्यविचार्य प्रगल्भसे।। 1.77।।** इति तं तर्जयति।

3.4. मायावत्याः मुग्धात्वम् -

यदा मायावती **अयि नर्ममित्र माधव नन्दनलाभेन** इत्यादिगीतेन पुष्पाञ्जलिं समर्पयति, तदा विदूषकः **माधव नन्दनलाभेन** इति मुकुन्दनन्दनस्य तवैव लाभमेषा अभ्यर्थयति। इति तस्याः पदं विशदयति। किन्तु नर्ममित्रमाधव, नन्दनलाभेन इत्यत्र विवदमानौ विदूषक-प्रद्युम्नौ तस्या मुखादेव अवधारयाव इति वेतसतरुकुहरात् निर्गच्छतः।

तदा मायावती सखीभ्यां सह ससम्भ्रमम् उत्तिष्ठति। तदा मनोरमा - **"क एष रमणीयवेषो राजकुमार इव तव पूजया प्रसन्नः मदनः पुरतः सन्निधत्ते। "** इति कथनात् पुनः मायावती - **"विचक्षणे एतस्य राजपुत्रस्य अखिलं वृत्तान्तं पृच्छस्व"** इत्यवदत्।

एवमत्र मायावती मुग्धात्वेन वर्णिता।

3.5. आत्मनः भार्यात्वेन स्वीकारे प्रद्युम्नस्य मानसिकस्थितिः -

मायावती-विचक्षणा-प्रद्युम्न-विदूषकाणां परस्परप्रश्नोत्तरपरिचयप्रसङ्गे विचक्षणायाः - **एष प्रसूनायुधः सख्याः मायावत्याः रमणः** इति वचनं श्रुत्वा, प्रद्युम्नः - **मयि मदनभावोपन्यासेन सकलमिदं नूनमळीकं स्यादिति डोलायते हृदयम् -** इति ब्रवीति।

3.6. सामाजं प्रत्युपदेशः -

अपि च **"दिष्ट्या सम्पन्ना तव मनोरथसिद्धिः। तस्मात्त्वरस्व त्वं देव्या अस्याः पाणिग्रहणमङ्गळे।"** इति विदूषकवचनं श्रुत्वा, प्रद्युम्नः - **अहो! कष्टमियति वयसि वर्तमानस्यापि तव बुद्धेरुपरि प्लवता। यदविमृश्यैव यत्किञ्चिदभिलपसि।** इति क्रोधं प्रकटयति।

तथा - "मां हि शैशवदशायां मायाविनश्शम्बरादभिरक्षितवतीयमित्येतावदभ्युपगतमेव। किन्तु जन्मान्तरदाम्पत्योपन्यासेन प्रक्षोभनं हन्त! न शक्नोम्यानन्दयितुं विमर्शशीलमन्तरात्मानम्।"

शृणु सखे! - **कल्याणी योषिदियं कामं रतिरस्तु वामा वा।**
असकृद्विमृशन्नप्यहमात्मानं न स्मरामि कन्दर्पम्।। 83।।

---

10. **सा तु दशमवर्षीया** इति स्मृतिः। (कल्पद्रुमः)

11. **पाणिगृहीती भार्यायाम्** पा.सू. 4.1.52, **पाणिग्रहणसंस्काराः सवर्णासूपदिश्यते।** इति मनुः।

कल्याणी इयं योषित् रतिः, वामा वा अस्तु। असकृत् विमृशन्नप्यहम् आत्मानं कन्दर्पत्वेन (मन्मथत्वेन) न स्मारामि - मम स्मृतिपथं नायाति। इत्येवं मायावतीं पत्नीत्वेन अङ्गीकर्तुं निराकरोति। एवमत्र नाटके प्रद्युम्नः परमधार्मिकत्वेन समुपवर्णितः।

3.6.1. परदारान् उद्दामदीपकलिकात्वेन तोलनम् -

अपि च प्रद्यम्नम् अपवार्य, ते एनां रमणीयां **वनितां विहातुं न साम्प्रतम्। लोके कोपि अभिज्ञः पुरुषः स्वयमागतां लक्ष्मीं निराकरोति वा** ?[12] इति विदूषके पृष्टे सति प्रद्युम्नः तमात्मनः मित्रं तत्त्वार्थमुपदिशति -

सौन्दर्यसारनिलया इति चापलेन, प्राज्ञः कथं परिरभेत परस्य दारान् ?।
उद्दामदीपकलिकां परमुज्ज्वलेति, कौतूहलात् क इह चुम्बितुमुत्सहेत [13]।। इति।

एवं विदूषकाय परस्य दारान् उद्दामदीपकलिकात्वेन उपदिशन् प्रद्युम्नः रतिं स्वभार्यात्वेन नाङ्गीकरोति[14]।

ततः खिन्ना मायावती ततः अपसरति। प्रद्युम्नो ऽपि पश्चात्तापी सन् विदूषकेन सह दर्भकमुन्याश्रमं गच्छति।

इत्येवमत्र नाटके कविना नायकः [15] प्रद्युम्नः विनीतादिगुणसम्पन्नत्वेन परमधार्मिकत्वेन वर्णितः, मायावती च आदर्शनारीत्वेन समुपवर्णिता इति।

-0-

4.आधारग्रन्थसूची

1.	**प्रद्युम्नानन्दीयनाटकम् -** वेङ्कटाचार्यः, सम्पादकौ - प्रो. के. राजगोपालन्, डा. पठान् महम्मद् वलि खान्, वनमालीप्रकाशनम्, तिरुपति - 2015
2.	**अमरकोशः** (शब्दकल्पद्रुम-वाचस्पत्य-वीलियम्-आप्टे डिक्शनरी सहितः) - मोबैल् याप्, निर्माणम् - सृजनझा, निर्देशनम् - प्रो. मदनमोहनझा, राष्ट्रियसंस्कृतसंस्थानम्, क.जे. सोमय्या संस्कृतविद्यापीठम्, मुम्बई।

12. **वनितां रमणीयामेनां विहातुं तेन साम्प्रतम्। निराकरोति को लक्ष्मीमभिज्ञस्स्वय8मागताम्।।** प्रद्यु. 1.84
13. प्रद्युम्नानन्दीयनाटकम्, 1.85
14. **प्रजानां रक्षणं दानमिज्याध्ययनमेव च। विषयेष्वप्रसक्तिश्च क्षत्रियस्य समासतः।।** मनुस्मृतिः, 1.89
15. **नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः। रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा।।**
बुद्ध्युत्साह-स्मृति-प्रज्ञा-कला-मानसमन्वितः। शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः।। दशरूपकम्, 2.1-2